"भारतस्यास्य वर्षस्य नव भेदान् निबोध मे।
इन्द्रद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान् ॥")

ताम्रवर्णा, स्त्री, (ताम्रस्येव वर्णोऽस्या इति। टाप्।) ओड्रपुष्पवृक्षः। इति शब्दचन्द्रिका ॥

ताम्रवल्ली, स्त्री, (ताम्रवर्णा वल्ली। मध्यपदलोपी समासः।) मञ्जिष्ठा। इति रत्नमाला ॥ चित्र-कूटदेशप्रसिद्धा लता। तत्पर्य्यायः। ताम्रा २ ताली ३ तमाली ४ तमालिका ५ स्वच्छवल्ली ६ सुलोमा ७ शोधनी ८ तालिका ९। अस्या गुणाः। कषायत्वम्। कफदोषमुखकण्ठोत्थ-रोगनाशित्वम्। श्लेष्मशुद्धिकारित्वञ्च। इति राजनिर्घण्टः ॥

ताम्रवीजः, पुं, (ताम्रवर्णं वीजमस्य।) कुलत्थः। इति राजनिर्घण्टः ॥

ताम्रवृक्षः, पुं, (ताम्रमिव रक्तवर्णो वृक्षः।) रक्तचन्दनम्। कुलत्थः। इति रत्नमाला ॥

ताम्रवृन्तः, पुं, (ताम्रमिव रक्तवर्णं वृन्तमस्य।) कुलत्थः। इति त्रिकाण्डशेषः ॥

ताम्रवृन्ता, स्त्री, (ताम्रमिव रक्तवर्णं वृन्तमस्याः इति टाप्।) कुलत्थिका। इति हेमचन्द्रः। ४।२४१॥

ताम्रशिखी, [न्] पुं स्त्री, (ताम्रवर्णा शिखा चूडा अस्त्यस्य। अत इनिः।) कुक्कुटः। इति जटाधरः ॥

ताम्रसारं, क्ली, (ताम्रवत् रक्तवर्णः सारोऽस्य।) रक्तचन्दनम्। इति रत्नमाला ॥

ताम्रसारकं, क्ली, (ताम्रसार+स्वार्थे कन्।) रक्तचन्दनम्। इति राजनिर्घण्टः ॥

ताम्रसारकः, पुं, (ताम्रवत् रक्तवर्णः सारोऽस्येति कप्।) रक्तखदिरः। इति राजनिर्घण्टः ॥

ताम्रा, स्त्री, (ताम्र+टाप्।) सैंहली। इति राजनिर्घण्टः ॥ (प्रजापतेः कश्यपस्य पत्नीना-मन्यतमा। यथा, मात्स्ये। ६।२।
"सुरभिर्विनता तद्वत्ताम्रा क्रोधवशा इरा ॥"
सप्तत्वगन्तर्गतचतुर्थत्वग्विशेषः। यथा,—
"चतुर्थी ताम्रा नामाष्टभागप्रमाणा विविध-किलासकुष्ठाधिष्ठाना ॥" इति सुश्रुते शारीर-स्थाने चतुर्थेऽध्याये ॥)

ताम्राक्षः, पुं, रूपद्वीपभेदः। इति शब्दमाला ॥

ताम्राक्षः, पुं, (ताम्रे रक्ताभे अक्षिणी यस्य। अक्षिन्+समासे षच्।) कोकिलः। इति त्रिकाण्डशेषः ॥ (ताम्रनयने, त्रि। यथा, भागवते। १।७।३३।
"तत आसाद्य तरसा दारुणं गौतमीसुतम्।
बबन्धामर्षताम्राक्षः पशुं रसनया यथा ॥")

ताम्राभं, क्ली, (ताम्रमिवाभातीति। आ+भा+कः। ताम्रवदाभा अस्येति वा रक्तवर्णत्वात् तथात्वम्।) रक्तचन्दनम्। इति शब्दचन्द्रिका ॥ (पर्व्वतविशेषः। यथा, ब्रह्माण्डे ४७ अध्याये।
"रुचका निषधं प्राप्ता ताम्राभं निषधादपि ॥")

ताम्रार्द्धं, क्ली, (ताम्रस्यार्द्धं अर्द्धभागतया उत्-पत्तिकारणमस्य ताम्रस्यार्द्धं उत्पादकोऽस्य इति घ।) कांस्यम्। इति त्रिकाण्डशेषः ॥

ताम्रिकः, पुं, (ताम्रं तत्पात्रादिनिर्म्माणं कार्य्य-त्वेनास्त्यस्य। ताम्र+ठन्।) कंसकारः। इति शब्दरत्नावली ॥ ताम्रनिर्म्मिते, त्रि। यथा, कार्षिके ताम्रिके पणः। इत्यमरः। २।९।८८॥ (यथा, मनुः। ८।१३६।
"कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः॥")

ताम्रिका, स्त्री, (ताम्रवद्वर्णाभा अस्त्यस्या इति ठन् ततः टाप्।) गुञ्जा। इति राज-निर्घण्टः ॥ मानरन्ध्रावाद्यम्। इति भूरि-प्रयोगः ॥

ताम्री, स्त्री, (ताम्रस्य विकारः। इति अण् ततो ङीप्।) वाद्यविशेषः। तत्पर्य्यायः। मान-रन्ध्रा २ विकारिका ३। इति त्रिकाण्डशेषः ॥

ताय, ऋ ङ पालने। सन्ततौ। इति कविकल्प-द्रुमः ॥ (भ्वां-आत्मं-सकं-सेट्।) सन्ततिर्विस्तारः। ऋ, अतत्तायत्। ङ, तायते विद्यां सुधीः। इति दुर्गादासः ॥

तायिकः, पुं, (ताये पालने साधुरिति ठञ्।) तर्ज्जिकाभिधदेशः। इति हेमचन्द्रः। ४।२४ ॥

तारं, क्ली, (तार्य्यते विस्तार्य्यते इति। तॄ+णिच्+घञ्।) रूप्यम्। इति मेदिनी। रे, ४३ ॥ ("दग्धोत्तीर्णं सुशीतं यन्निर्म्मलं कुन्दसन्निभम्।
गुरुस्निग्धकुमारञ्च तारमुत्तममिष्यते ॥"
अशुद्धस्यास्य गुणा यथा,—
"आयुः शुक्रं बलं हन्ति रोगसंघं करोति च।
अशुद्धत्वात्ततस्तारं शुद्धमाश्रयतां बुधैः ॥"
अस्य मारणं यथा,—
"कण्टवेध्यं तारपत्रं दिग्धाद्द्विगुणहिङ्गुलम्।
पातयन्ते रसो ग्राह्यो रजतं मृतमुच्यते ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणा-धिकारे ॥) मुक्ता। इति राजनिर्घण्टः ॥ (यथा, रसेन्द्रसारसंग्रहे त्रैलोक्यचिन्तामणि-वटिकायाम्।
"हारं सुवर्णं मृतञ्च तारम् ॥"
"तारं मौक्तिकम्। तारशब्देनात्र मौक्तिक-मेवोच्यते न तु रजतम्।" इति तट्टीका ॥ गौणसिद्धिभेदः। यथा, "विहन्यमानस्य दुःखस्य त्रित्वात् तद्विघातास्त्रय इति इमा मुख्यास्तिस्रः सिद्धयस्तदुपायतया त्वितरा गौण्यः पञ्चसिद्धय-स्तत्रापि हेतुमत्तया तिस्रः हेतुतया पञ्च व्यवस्थिताः। तास्वाद्या अध्ययनादिलक्षणाः सिद्धयो हेतवः मुख्यास्तु हेतुमत्यः। विधिवद्-गुरुमुखादध्यात्मविद्यानां अक्षरस्वरूपग्रहण-मध्ययनं प्रथमसिद्धिस्तारमुच्यते ॥" इति तत्त्व-कौमुदी ॥ अक्षिमध्यम्। इति मेदिनी। रे, ४३ ॥)

तारः, पुं, वानरविशेषः। मुक्ताविशुद्धिः। शुद्ध-मौक्तिकः। इति मेदिनी। रे, ४३ ॥ (तार्य्यते उत्तार्य्यते भवसागरादनेन। तॄ+णिच्+घञ्। यद्वा तारयति स्वोच्चारणजपादिभिर्लोकान्। तॄ+णिच्+अच्। एतन्निरुक्तिर्यथा, काशी-खण्डे। ७३ अध्याये।
"तारयेद् यद् भवाम्भोधेः स्वजपासक्त-मानसम्।
ततस्तार इति ख्यातो यस्तं ब्रह्मावलोकवत्॥")
प्रणवः। इति तन्त्रम् ॥ (यथा, महागणपति-स्तोत्रे। २।
"तारश्रीपरशक्तिकामवसुधारूपानुगं यं विदु-स्तस्मै स्तात् प्रणतिर्गणाधिपतये यो रागिणा-भ्यर्थ्यते ॥")
तरणम्। इति विश्वः ॥ कूर्च्चवीजम्। इति तन्त्रसारम् ॥ (नक्षत्रम्। इति मेदिनी। रे, ४३ ॥ अत्युच्चशब्दः। इति हेमचन्द्रः। ६।३८ ॥ यथा, हेमचन्द्रटीकायाम्।
"नृणामुरसि मन्द्रस्तु द्वाविंशतिविधो ध्वनिः।
स एव कण्ठमध्यः स्यात् तारः शिरसि गीयते॥"
विष्णुः। यथा, महाभारते। १३।१४९।११७।
"अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ॥"
राक्षसविशेषः। यथा महाभारते। ३।२८४।९।
"युयुधे लक्ष्मणश्चापि तथैवेन्द्रजिता सह।
विरूपाक्षेण सुग्रीवस्तारेण च निखर्व्वटः ॥"
दैत्यविशेषः। यथा, हरिवंशे। ४३। ९।
"तारस्तु क्रोशविस्तारमायसं वायसध्वजम् ॥")
महादेवः।
"काश्यां विश्वेश्वरोऽहं गिरिपतितनयासंयुतो वामभागे
शुण्डादण्डेन दत्ते त्रिपथगतटिनीतीर-शुद्धाम्बुभागे।
मायावीजञ्च कर्णे सुरमुनिसहितो ध्यानयुक्तं वदामि
प्रीत्या लोकस्य तस्मात् सुरमुनिगणकैरुच्यते तारनाम ॥"
इति शब्दार्थचिन्तामणिः ॥)

तारः, त्रि, अत्युच्चशब्दविशिष्टः। इति मेदिनी। रे, ४४ ॥ स्फुरितकिरणः। निर्म्मलः। इति धरणिः ॥ (तारं मुक्तास्त्यत्रेति अच्। मुक्ता-विशिष्टः। यथा, अमरुशतके। २८।
"उरसि निहितस्तारो हारः कृता जघने घने ॥")

तारकं, क्ली, (तारेण कनीनिकया कायतीति। कै+कः।) चक्षुः। इति मेदिनी। के, १०० ॥

तारकं, क्ली, स्त्री, (तारमेव। स्वार्थे कन्।) चक्षुस्तारा। नक्षत्रम्। इति मेदिनी। के,१००॥

तारकः, पुं, (तारयति दैत्यानिति। तॄ+णिच+ण्वुल्।) द्वादशमन्वन्तरीयेन्द्रशत्रुरसुरविशेषः। यथा,—
"मनोस्तु दक्षपुत्रस्य द्वादशस्यात्मजान् शृणु।
देववानुपदेवश्च देवश्रेष्ठो विदूरथः ॥
मित्रवान् मित्रदेवश्च मित्रविन्दश्च वीर्य्यवान्।
मित्रबाहुः सुवर्चाश्च दक्षपुत्रमनोः सुताः ॥
तपस्वी सुतपाश्चैव तपोमूर्त्तिस्तपोरतिः।
तपोधृतिर्द्युतिश्चान्य ऋषयश्च तपोधनाः ॥
सुधर्म्माणः सुतपसो हरिता रोहितास्तथा।
सुरादयो गणाः पञ्च प्रत्येकं दशको गणः ॥